From ***R.gveda***

नि त्वा दधे वर आ पृथिव्या इळायास् पदे सुदिनत्वे अह्नाम् ।
दृषद्वत्याम् मानुष आपयायां सरस्वत्यां रेवद् अग्ने दिदीहि ॥

I place you in an excellent spot of earth on an auspicious day of days; do you, Agni, shine on the frequent (banks) of the Dr.s.advati_, A_paya_ and Sarasvati_ rivers.

[R.gveda, 3.023.04]
p261

पावका नः सरस्वती वाजेभिर् वाजिनीवती ।
यज्ञं वष्टु धियावसुः ॥

May Sarasvati_ the purifier, the bestower of food, the recomposer of worship with wealth, be attracted by our offered viands to our rite.

[R.gveda, 1.003.10]
p663

सरस्वती साधयन्ती धियं न इळा देवी भारती विश्वतूर्तिः ।
तिस्रो देवीः स्वधया बर्हिर् एदम् अच्छिद्रम् पान्तु शरणं निषद्य ॥

May the three goddesses, Sarasvati_, perfecting our understanding, the divine il.a_, and all-impressive Bha_rati_, having come to our dwelling, protect this faultless rite, (offered) for our welfare.

[R.gveda, 2.003.08]
p667

अम्बितमे नदीतमे देवितमे सरस्वति ।
अप्रशस्ता इव स्मसि प्रशस्तिम् अम्ब नस् कृधि ॥

Sarasvati_, best of mothers, best of rivers, best of goddesses, we are, as it were, of no repute; grant us, mother, distinction.

[R.gveda, 2.041.16]
p668

बृहद् उ गायिषे वचोऽसुर्या नदीनाम् ।
सरस्वतीम् इन् महया सुवृभि स्तोमैर् वसिष्ठ रोदसी ॥

You chant, Vasis.t.ha a powerful hymn to her who is the most mighty of rivers; worship, Vasis.t.ha with well-selected praises, Sarasvati_, who is both in heaven and earth.

[R.gveda, 7.096.01]
p679

त्रिः सप्त सस्रा नद्यो महीर् अपो वनस्पतीन् पर्वताअग्निम् ऊतये ।
कृशानुम् अस्तृन् तिष्यं सधस्थ आ रुद्रं रुद्रेषु रुद्रियं हवामहे ॥

We invoke for protection the thrice seven flowing rivers, (their) great waters, the trees, the mountains, Agni, Kr.s'a_nu, the archers, and Tis.ya, to the assembly; (we invoke) Rudra, worthy of the praise of the Rudras, for the good of the praisers.

[R.gveda, 10.064.08]
p685

सरस्वती सरयुः सिन्धुर् ऊर्मिभिर् महो महीर् अवसा यन्तु वक्षणीः ।
देवीर् आपो मातरः सूदयित्न्वो घृतवत् पयो मधुमन् नो अर्चत ॥

May the very great rivers, Sarasvati_, Sarayu, Sindhu, come with their waves for (our) protection; may the divine maternal animating waters grant us their water mixed with butter and honey.

[R.gveda, 10.064.09]
p685

From ***Atharvaveda***

सरस्वती देवयन्तो हवन्ते सरस्वतीमध्वरे तायमाने
सरस्वती सुकृतो हवन्ते सरस्वती दाशुषे वार्यं दात्
सरस्वती पितरो हवन्ते दक्षिणा यज्ञमभिनक्षमाणाः
आसद्यास्ं इन् बर्हिषि मादयध्वमनमीवा इष आधेयस्मे
सरस्वति या सरथं ययाथोक्थैः स्वधाभिर्देवि पितृभिर्मदन्ती
सहस्रार्घमिडो अत्र भागं रायस्पोषं यजमानाय धेहि

On Sarasvati_ do the pious call; on Sarasvati_, while the sacrifice is being extended; on Sarasvati_ do the well-doers call; may Sarasvati_ give what is desirable to the worshipper (da_s'va_ns).

On Sarasvati_ do the Fathers call, arriving at the sacrifice on the south; sitting on this barhis do you revel; assign you to us food (is.as) free from disease.

O Sarasvati_, that went in company (saratham) with the songs (uktha_), with the svadha_s, O goddess, reveling with the Fathers, assign thou to the sacrificer here a portion of refreshment (id.) of thousandfold value, abundance of wealth.

[Atharvaveda, 18.1.41-43,18.4.45-47]
p633

यस्ते स्तनः शशयुर्यो मयोभूर्यः सुम्नयुः सुहवो यः सुदत्रः
ये न विश्वा पुष्यसि वार्याणि सरस्वती तमिह धातवे कः

The breast of thine that is unfailing, that is kindly, that is favourable, easy of invocation, that is very liberal, with which thou gainest all desirable things – O Sarasvati_, may thou cause (us) to suck that here.

[Atharvaveda, 7.11]
p706

दिव्यम् सुपर्णम् पयसम् बृहन्तमपाम् गर्भम् वृषभमोषधीनाम्
अभीपतो वृष्ट्या तर्पयन्तमानो गोष्ठे रयिष्ठाम् स्थापयाति

(Him), the heavenly eagle, milky, great, embryo of the waters, bull of the herbs, gratifying with rain from close by, in our cow-stall standing in wealth may (one) establish.

[Atharvaveda, 7.39.1]
p707

From ***Yajurveda***

अपो देवा मध्बुमतीरगृभ्णन्नूर्जस्वती राजस्वश्चितानाः
याभिर्मित्रावरुणावभ्यषिञ्चन्याभिरिन्द्रमनयन्नत्यरातीः

The Gods drew waters with their store of sweetness, succulent and observant, king-creating, wherewith they sprinkled Varun.a and Mitra, wherewith they guided Indra past his foemen.

[Yajurveda, 10.1]
p691

सरस्वतीरिवे प्रार्थना गृह्णति – ताभीरभिसिञ्चति सरस्वती वाचैवैनमेतदभिषिञ्चति

He first takes water from the river Sarasvati_ . There with he sprinkles him – Sarasvati_ being the goddess of speech it is with speech he thereby sprinkles him.

[Aitareya Bra_hman.a, 1.28,3,15]
p692

पञ्च नद्यः सरस्वतीमपि यन्ति सस्रोतसः
सरस्वती तु पञ्चधा सो देशेभवत्सरित्

Five rivers flowing on their way speed onward to Sarasvati_, but then became Sarasvati_ a fivefold river in the land.

[Yajurveda, 34.11]
p692

From ***Manusmr.ti***

सरस्वती दृषद्वत्योर् देवनद्योर्यदन्तरम् ।
तं देवनिर्मितं देशं ब्रह्मावर्त्तम् प्रचक्षते ॥

That God-created land between the Devanadis of Sarasvati_ and Dr.s.advati_ is called Brahma_vartta.

[Manusmr.ti, 2.17]
p713

From ***Maha_bha_rata***

दक्षिणेन सरस्वत्या उत्तरेण दृषद्वतीम् ।
ये वसन्ति कुरुक्षेत्रे ते वसन्ति त्रिविष्टपे ॥

Those who live in Kuruks.etra bound by Sarasvati_ in the south and Dr.s.advati_ in the north (in fact) live in heaven.

[Maha_bha_rata, Vanaparva, 81.175]
p713

From ***Va_lmi_ki Ra_ma_yan.a***

नदीं भागीरथीं रम्यां सरयूं कौशिकी तथा ।
कालिन्दीं यमुनां रम्यां यामुनं च महागिरिम् ॥
सरस्वतीं च सिन्धुं च शोणम् मनिनिबोधकम् ।

[Va_lmi_ki Ra_ma_yan.a, Kis.kinda_ ka_n.d.a, 40/20-21]
p716

From ***Va_mana Pura_n.a***

स्नात्वा शुद्धीम् अवाप्नोति यत्र प्राची सरस्वती ।
देवमार्गप्रतिष्ठा या देवमार्गेण निःसृता ॥

[Va_mana Pura_n.a, Sm. 21.19]
p717

From ***Bha_gavata Pura_n.a***

अथादीक्षत राजा तु हयमेधशतेन सः ।
ब्रह्मावर्ते मनोः क्षेत्रे यत्र प्राची सरस्वती ॥

[Bha_gavata Pura_n.a, 4.19.1]
p717

From ***Padma Pura_n.a***

पुष्करारण्यमासाद्य प्राची यत्र सरस्वती ।
मतिः स्मृतिः शुभा प्रज्ञा मेधाबुद्धिर्दया परा ॥

[Padma Pura_n.a, Sr.s.t.i, 18.220]
p717

From ***Brahmavaivarta Pura_n.a***

पुण्यक्षेत्रे ह्याजगाम भारते सा सरस्वती ।
गङ्गशापेन कलया स्वयम् तस्थौ हरेः पदम् ॥

[Brahmavaivarta Pura_n.a, ii.7.1]
p717

From ***Ams'ubheda_gama***

सा चतुर्हस्ता श्वेतपद्मासनान्विता जटामुकुटसंयुक्ता शुक्लवर्णा सितंबरा ।
यज्ञोपवीतासंयुक्ता रत्नकुण्डलमण्डिता व्याख्यानं चाक्षसूत्रं च दक्षिणे करद्वये ॥
पुस्तकं पुण्डरीकं च त्रिनेत्रा चारुरूपिणी ।

She, the goddess of white complexion, wears white garments and sits on white lotus. She wears yajn~opavi_ta, ratna kun.d.ala and jat.a_ mukut.a. She has four hands showing the vya_khya_na pose and holds a rosary (aks.asu_tra), a book and a lotus. She has three eyes.

[TAG Rao, Elements of Hindu Iconography, Vol I, Pt II, pp 136-137]
p718

From ***Vis.n.udharmottara Pura_n.a***

देवी सरस्वती कार्या सर्वाभरणभूषिता ।
चतुर्भुजा सा कर्तव्या तथैव च समुत्थिता ॥
पुस्तकं च क्षमालं च तस्या दक्षिणहस्तयोः ।
वामयोश्च तथा कार्या वैणवी च कमण्डलु ॥
समपाश प्रतिष्ठा च कार्या सोममुखी तथा ।
वेदस्तस्या भुजाज्ञेयाः सर्वशास्त्राणि पुस्तकम् ॥

She, the goddess of white complexion, wears white garments and sits on white lotus. She wears yajn~opavi_ta, ratna kun.d.ala and jat.a_ mukut.a. She has four hands showing the vya_khya_na pose and holds a rosary (aks.asu_tra), a book and a lotus. She has three eyes.

[Vis.n.udharmottara Pura_n.a, 664, 1-3]
p719

From ***Sri_madbha_gavata***

ब्रह्मनद्यां सरस्वत्यां आश्रमः पश्चिमे तटे ।
शम्याप्रास इति प्रोक्ता ऋषीणां सत्रवर्धनाः ॥

The Sarasvati_ is a Brahmanadi_ as on its banks thousands of sages observe Brahmopa_sana (meditation). There is a famous hermitage called S'amya_s'rama on the western bank where sacrifices are performed.

[Sri_madbha_gavata, 2.7.1]
p727

From ***Skanda Pura_n.a***

एवमुक्त्वा स विप्रर्षिरवतीर्यं धरातले ।
गतः प्लक्षतरुं यस्मादवतीर्णा सरस्वती ॥

[Skanda Pura_n.a Na_gara Ka_n.d.a, 173, 9]
p746

रन्ध्रद्वयेन विप्रेन्द्रा लोचनाभ्याम् निरीक्षणात् ।
एकस्य सलिलं क्षिप्रं यत्र जाता सरस्वती ॥

[Skanda Pura_n.a Na_gara Ka_n.d.a, 173, 12]
p746